सन्धिः इति। अत्र राज्ञो ब्राह्मणैः सह देशप्रत्यासत्तावपि सत्यां मूर्तिविभागो गृह्यते इति ब्राह्मणमिश्रो राजा इति प्रत्युदाह्रियते। उदाहरणेष्वविभागापत्तिरेव गुडमिश्राः इति ॥

## नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः। (१५५/३८८९)

[1]सम्पादि अर्ह हित अलम् [2]इत्येवमर्था ये तद्धिताः तदन्तानि उत्तरपदानि नञो गुणप्रतिषेधे वर्तमानात् पराणि अन्तोदात्तानि भवन्ति। सम्पादि-कर्णवेष्टकाभ्यां सम्पादि मुखं कार्णवेष्टकिकम्, न कार्णवेष्टकिकम् अकार्णवेष्टकिकम्। अर्ह – छेदमर्हति छैदिकः, न छैदिकः अच्छैदिकः। हित – वत्सेभ्यो हितः वत्सीयः, न वत्सीयः अवत्सीयः। अलमर्थ – सन्तापाय प्रभवति सान्तापिकः, न सान्तापिकः असान्तापिकः। नञः इति किम्? गर्दभरथमर्हति, गार्दभरथिकः। विगार्दभरथिकः। गुणप्रतिषेधे इति किम्? गार्दभरथिकादन्यः अगार्दभरथिकः। गुण इति [3]तद्धितार्थप्रवृत्तिनिमित्तं सम्पादित्वाद्युच्यते। तत्प्रतिषेधो यत्रोच्यते समासे तत्रायं विधिः कर्णवेष्टकाभ्यां। सम्पादि मुखम् इति। सम्पाद्यर्हहितालमर्थाः इति किम्? पाणिनीयमधीते पाणिनीयः, [4]न पाणिनीयः अपाणिनीयः। तद्धिताः इति किम्? कन्यां वोढुमर्हति कन्यावोढा, न वोढा अवोढा। 'अर्हे कृत्यतृचश्च' (३.३.१६९/२८२२) इति तृच् ॥

## ययतोश्चातदर्थे। (१५६/३८९०)

[5]य यत् इत्येतौ यौ तद्धितावतदर्थे वर्तेते तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयादन्त उदात्तो भवति। [6]पाशानां समूहः पाश्या, न पाश्या अपाश्या। अतृण्या। यत्[7] – दन्तेषु भवं दन्त्यम्, [8]न दन्त्यम् अदन्त्यम्। अकर्ण्यम्। अतदर्थे इति किम्? पादार्थमुदकं पाद्यम्, न पाद्यम् अपाद्यम्। तद्धिता इत्येव, [9]अदेयम्। गुणप्रतिषेधे इत्येव, दन्त्यादन्यद् अदन्त्यम्। निरनुबन्धकैकानुबन्धकयो[10]र्ययतोर्ग्रहणादिह न भवति, 'वामदेवाड्ड्यड्ड्यौ (४.२.५/१२१०) वामदेव्यम्, न वामदेव्यम् अवामदेव्यम् इति ॥

## अच्कावशक्तौ। (१५७/३८९१)

[11]अच् क इत्येवमन्तमशक्तौ गम्यमानायामुत्तरपदं नञः परमन्तोदात्तं भवति। अपचः [12]यः पक्तुं न शक्नोति[13]। अजयः। कः खल्वपि – अविक्षिपः। अविलिखः। अशक्तौ इति किम्? अपचो दीक्षितः। अपचः [14]परिव्राजकः[16] ॥

## आक्रोशे च। (१५८/३८९२)

आक्रोशे च गम्यमाने नञः [16]उत्तरमच्कान्तम् अन्तोदात्तं भवति। अपचोऽयं जाल्मः अपठोऽयं जाल्मः। पक्तुं पठितुं [17]शक्तोऽप्येवमाक्रुश्यते। अविक्षिपः। अविलिखः ॥

---

1. अन्त उदात्त इति वर्तते ह. 2. एतदन्ताः ह. 3. तद्धितप्रवृत्तिनिमित्ताम् फ. 4. न पाणिनीयः नास्ति फ. 5. नञ इति वर्तते इत्यधिकम् फ. 6. पाशादिभ्यो यः इत्यधिकम् फ. 7. खल्वपि इत्यधिकम् ह. 8. शरीरावयवात् यच्च इत्यधिकम् ह. 9. अधेयम् ब. फ. ह. 10. ययतोः नास्ति फ. 11. नञः इति वर्तते इत्यधिकम् फ. 12. अयं ह. 13. अपठः इत्यधिकम् ब. फ. 14. परिव्राट् ब. 15. गुणप्रतिषेध इत्येव, अन्यो यः पचादपचः इत्यधिकम् ब. 16. उत्तरपदम् फ. 17. शक्तोऽपि सन् ह.